# Devikakritam Balakrishna Stotram

# દેવિકાકૃતં બાલકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Devikakritam Balakrishna Stotram

File name : devikAkRRitaMbAlakRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 70/35-50||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# દેવિકાકૃતં બાલકૃષ્ણસ્તોત્રમ્

પૃષ્ટવાઁસ્તાં લોમશો વૈ કા ત્વં પુરાऽધુનાऽપિ ચ ।
કમલા વા સતી ભક્તિઃ સાવિત્રી કાऽસિ કન્યકે ॥ ૩૫॥

દેવતા વા સંહિતા વા ગૃહગોધોત્થવિગ્રહા ।
કા ત્વં કલ્યાણસંસ્થાના વદ સન્દેહનાશિનિ ॥ ૩૬॥

પૃષ્ટૈવં સા બદ્રિકે સઞ્જગાદ શ‍ૃણ્વતાં સતામ્ ।
સભાજનાનાં સર્વેષાં મેઘગમ્ભીરયા ગિરા ॥ ૩૭॥

"નમો વોऽસ્તુ સમસ્તેભ્યો વ્યાસાય તે નમોऽસ્તુ ચ ।
શ્રીસંહિતાસ્વરૂપાયૈ લક્ષ્મ્યૈ દેવ્યૈ નમો નમઃ ॥ ૩૮॥

લક્ષ્મીનારાયણાયાऽત્ર કૃષ્ણકાન્તાય વૈ નમઃ ।
લોમશાય ગુરવે ચ મોક્ષદાય નમો નમઃ ॥ ૩૯॥

સર્વર્ષિભ્યશ્ચ સાધુભ્યઃ સાધ્વીભ્યશ્ચ નમો નમઃ ।
નમો માત્રે મહારાજ્ઞ્યૈ મહારાજાય વૈ નમઃ ॥ ૪૦॥

વૈષ્ણવેભ્યઃ સમસ્તેભ્યઃ કથાશ્રોતૃભ્ય ૐ નમઃ ।
નમો મણ્ડપદેવેભ્યો દેવીભ્યશ્ચ નમો નમઃ ॥ ૪૧॥

મુક્તમુક્તાનિકાભ્યશ્ચ સર્વેભ્યશ્ચ નમો નમઃ" ।
ક્ષમધ્વં ચાપરાધાન્મે દોષાન્ ક્ષમધ્વમીશ્વરાઃ ॥ ૪૨॥

સાધવો ઋષયઃ સર્વે રાજા રાજ્ઞી ચ વૈષ્ણવાઃ ।
સખીજનાઃ સખાયશ્ચ ક્ષમધ્વં મેऽપરાધકાન્ ॥ ૪૩॥

અહં નાણકિનીનામ્ની ખવાસિની પુરાऽભવમ્ ।
ભાણવાણીસખી રાજ્ઞ્યા દિનેશ્વર્યાશ્ચ કિઙ્કરી ॥ ૪૪॥

સ્વાર્થપરા સ્તૈન્યપરા ધર્મધનાऽવચોરિકા ।
સાऽહં મૃતા યામ્યદૂતૈર્નીતા યામ્યપુરં તતઃ ॥ ૪૫॥

ભુક્ત્વા પાપફલં તસ્માજ્જન્માર્થં ત્વિહ ચાઽઽગતા ।
ગૃહગોધા કર્મવશાજ્જાતાઽવશેષભોગિની ॥ ૪૬॥

પૂજાવારિસ્પૃષ્ટદેહા મૃતાઽત્ર કૃપયા મુનેઃ ।
પ્રસાદાશનતો નષ્ટા વાસના મમ સર્વથા ॥ ૪૭॥

બહુપુણ્યાઽસ્મિ સઞ્જાતા કથાયાઃ શ્રવણાદિહ ।
દિવ્યા દેવ્યસ્મિ સઞ્જાતા કૃપયા લોમશસ્ય ચ ॥ ૪૮॥

મોક્ષમિચ્છામિ ગન્તું વૈ નેચ્છામિ સ્વર્ગમિત્યપિ ।
મહ્યં મન્ત્રં હરેશ્ચાપિ નામધુન્યં પ્રપત્તિદમ્ ॥ ૪૯॥

લોમશોઽયં દદાત્વત્ર યેન યામિ પરાઽક્ષરમ્ ।
નમામિ પાદયોર્વશ્ચ કિઙ્કરી દેવિકાઽસ્મિ ચ ॥ ૫૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય ચતુર્થખણ્ડે
૭૦-અધ્યાયાન્તર્ગતં દેવિકાકૃતં બાલકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય ૭૦/૩૫-૫૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 70/35-50..

Proofread by PSA Easwaran

*Devikakritam Balakrishna Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*